# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – आचार्यः-२ (SEM-4) | **प्रश्नपत्रम् – ४** | गुणाः - ७० |
| विषयः – वास्तुशास्त्रम् | CC-5.4.12 | समयः - ३ तः ६ |
| दिनाङ्कः – २१/४/२०१६ | सन्दर्भग्रन्थः – समराङ्गणसूत्रधारः | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **अधोलिखितश्लोकयोः कस्यचित् एकस्योपरि ससन्दर्भं व्याख्यां कुरुत ।** | ०४ |
| | (१) भागेन कर्णिका कार्या विस्तृत्या निर्गमेण च ।<br>प्रतिभद्रं च भागार्धनिर्गतं तत्र कल्पयेत् ॥<br>(२) वसुधा वसुधारा स्यात् समायुक्ताग्रशालया ।<br>निर्गमः पुरतः कार्यः प्रासादस्य प्रमाणतः ॥ | |
| **प्रश्नः -२** | **अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु ।** | १२ |
| | (१) स्वस्तिकमण्डपलक्षणम् ।<br>(२) जगतीस्वरूपकथनम् । | |
| **प्रश्नः -३** | **अधोलिखितेषु पंक्तिद्वयं विस्तार्यम् ।** | ०४ |
| | (१) वेदीबन्धो भवेदस्य सार्धभागद्वयोच्छ्रितः ।<br>(२) शाला स्यात् पञ्चभिभागैः सार्धांशस्तु प्रतिरथः ।<br>(३) तद् वृत्तं विभजेत् क्षेत्रं चतुःषष्ठ्या पदैस्ततः ।<br>(४) गवाक्षैरलङ्कुर्यान्न कुर्यादुदकान्तरम् । | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः - ४** | **अधोलिखितश्लोकयोः कस्यचित् एकस्य ससन्दर्भं व्याख्यां कुरुत ।** | ०४ |
| | (१) यद्वा षोडशभिर्भक्ते विहायाधोंऽशकद्वयम् ।<br>पक्षरेखासानन्दैः स्तर्यैशक्रैश्च शस्यते ॥<br>(२) तारकाक्षित्रिभागेन कर्तव्या सुप्रतिष्ठिता ।<br>तारकायास्ततो मध्ये ज्योतिस्त्र्यंशेन कल्पयेत् ॥ | |
| **प्रश्नः -५** | **अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु ।** | १२ |
| | (१) वज्रादीनां रत्नलिङ्गनिर्माणफलम् ।<br>(२) विप्रादीनोपयोगीमृदा । | |
| **प्रश्नः -६** | **अधोलिखितेषु पंक्तिद्वयं विस्तार्यम् ।** | ०४ |
| | (१) पार्श्वरेखात्रिभागेन विस्तृतं चतुरश्रकम् ।<br>(२) प्रविभागस्य देवानां रेखाणां चापि लक्षणम् ॥<br>(३) गुल्मान्तरे शुभे क्षेत्रे पद्मिन्यां सरितस्तटे ।<br>(४) द्वे कले गोलकौ भागो मानेन तेन तु ॥ | |

| | | |
|---|---|---|
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -७** | **अधोलिखितयोः कस्यचित् एकस्योपरि ससन्दर्भं व्याख्यां कुरुत।** | ०४ |
| | (१) आरोमप्रभवा ज्ञेया व्याकृष्टधनुराकृतिः।<br>एवम्प्रमाणं स्यादेषां कर्णपृष्ठाश्रयोऽपि च॥<br>(२) कार्तिकेयस्य संस्थानमिदानीमभिधीयते।<br>तरुणार्कनिभो रक्तवासाः पावकसमप्रभः॥ | |
| | | |
| **प्रश्नः -८** | **अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखत।** | ०८ |
| | (१) प्रतिमाद्रव्याणि।<br>(२) अर्चान्तर्गते दोषगुणवर्णनम्। | |
| **प्रश्नः -९** | **अधोलिखितेषु कस्यचित् एकस्योपरि टिप्पणीं लिखतु।** | ०३ |
| | (१) ललाटप्रमाणम्।<br>(२) विष्णोर्लक्षणम्। | |
| | **चतुर्थान्वितिः - ४** | |
| **प्रश्नः -१०** | अधोलिखितश्लोकयोः कस्यचित् एकस्योपरि ससन्दर्भं व्याख्यं कुरुत। | ०४ |
| | (१) अष्टाशीत्यङ्गुलो हंसस्यायामः स्परिकीर्तितः।<br>विज्ञेया वृद्धिरन्येषां चतुर्णां द्व्याङ्गुलक्रमात्॥<br>(२) वैरिदर्शनवित्राससम्भ्रमोद्भ्रान्तलोचनः।<br>हृदि संक्षोभायोगाच्च रसो ज्ञेयो भयानकः॥ | |
| **प्रश्नः -११** | **अधोलिखितयोः कस्यचित् एकस्योपरि परिचयं लिखतु।** | ०८ |
| | (१) अर्धचन्द्रलक्षणं कर्माणि च।<br>(२) करिहस्तलक्षणम्। | |
| **प्रश्नः -१२** | **अधोलिखितयोः कस्यचित् एकस्योपरि टिप्पणीं लिखतु।** | ०३ |
| | (१) शशपुरुषः।<br>(२) शान्तरसलक्षणम्। | |

***